अपुष्पफल + दा + कर्त्तरि कः, उपपदसमासः ॥) पनसवृक्षः । इति राजनिर्घण्टः ॥ पुष्पव्यतिरेकजातफलवृक्षमात्रं ॥ (अहेतुकफलदातरि त्रिं)

अपूपः, पुं, (न पूयते विशीर्य्यति, न + पूय + पः, यलोपः ।) पिष्टकः । इत्यमरः ॥ गोधूमः । इति राजनिर्घण्टः ॥
("हव्याद्भरसं यावं पायसापूपमेव च" ।
इति मनुः ।)

अपूप्यः, पुं, (अपूपाय हितः "विभाषा हविरपूपादिभ्यः" इति पाणिनिसूत्रेण यत् ।) गोधूमचूर्णं । इति जटाधरः ॥ मयदा इति भाषा ।

अपूरणी, स्त्री, (न पूरयति पुष्पगन्धेन मनःप्रीतिं पूर्णां करोति निर्गन्धत्वात्, पूर + णिच् + कर्त्तरि ल्युट्, स्त्रियां ङीप् ततो नञ्समासः ।) शाल्मलिवृक्षः । इति शब्दचन्द्रिका ॥

अपूर्ब्बं, क्ली, (नास्ति पूर्ब्बं पूर्ब्बकालभवं दृष्टं यस्य तत् ।) कर्म्मजन्यमदृष्टं । तत्पर्य्यायः । अनुशयः २ नियोगः ३ अतिशयः ४ कार्य्यं ५ प्रयोगः ६ । इति स्मृतिः । तच्चतुर्विधं यथा । फलापूर्ब्बं १ समुदायापूर्ब्बं २ उत्पत्त्यपूर्ब्बं ३ अङ्गापूर्ब्बं ४ । येन स्वर्ग आरभ्यते तत् फलापूर्ब्बं । अमावास्यायां त्रयाणां यागानामेकः समुदायः पौर्णमास्यामपरः तयोर्भिन्नकालवर्त्तिनोः संहतफलापूर्ब्बारम्भायोगात्तदारम्भाय समुदायद्वयजन्यमपूर्ब्बद्वयं कल्पनीयं । तयोरेकैकस्यारम्भाय एकैकसमुदायवर्त्तिनां त्रयाणां यागानां भिन्नक्षणवर्त्तित्वेन संघातापत्त्यभावात् यागत्रयजन्यानि त्रीण्युत्पत्त्यपूर्ब्बाणि कल्पनीयानि । तेषाञ्चाङ्गोपकारमन्तरेणानिष्पत्तेरङ्गानां चानेकक्षणवर्त्तिनां संघातासम्भवात् अङ्गापूर्ब्बाणि कल्पनीयानि । तत्र त्वयं विभागः । इत्यधिकरणमाला ॥

अपूर्ब्बः, त्रि, (नास्ति पूर्ब्बं यस्य, न पूर्ब्बः नञ्समासः ।) आश्चर्य्यं । यथा,—
"अपूर्ब्बेयं हरेर्माया त्रिगुणा रज्जुरूपिणी ।
यया मुक्तो न चलति बद्धो धावति धावति" ॥
इति उद्भटः ॥ पूर्ब्बदिग्देशकालभिन्नं ॥

अपेतराक्षसी, स्त्री, (अपेतः राक्षस इव पातकं यस्याः सा, गौरादित्वात् ङीष् ।) तुलसीवृक्षः । इति राजनिर्घण्टः ॥

अपेयं, त्रि, (पा + कर्म्मणि अर्हाद्यर्थे यत् ।) पानायोग्यं । अपानीयं । यथा,—"मद्यमपेयमदेयमनिग्राह्यं" । इति तिथ्यादितत्त्वे उशनःसूत्रं ॥
("जलधिजलमपेयं पण्डिते निर्धनत्वं" ।)
("यैः कृतः सर्व्वभक्ष्योऽग्निरपेयश्च महोदधिः ।
क्षयी चाप्यायितः सोमः को न नश्येत्प्रकोप्य तान्" ॥
इति मनुः ।)

अपेक्षणीयं, त्रि, (अप + ईक्ष + कर्म्मणि अनीयर् ।) अपेक्षायोग्यं । अपेक्ष्यं । अपेक्षितव्यं । यथा,—
"आत्मा यत्नेन रक्ष्यो रणशिरसि पुनः सोऽपि नापेक्षणीयः" । इति नवरत्नमध्ये शङ्कुः ॥

अपेक्षा, स्त्री, (अप + ईक्ष + भावे अ, स्त्रियां टाप् ।) कार्य्यनिमित्तयोरन्योन्याभिसम्बन्धः । इति सुपद्मटीकायां विष्णुमिश्रः ॥ आकाङ्क्षा । यथा,—
"सा प्रक्रिया या कथमित्यपेक्षा" । इति वेदान्तटीकायां वाचस्पतिमिश्रः ॥ (आकाङ्क्षा । अभिलाषः । आशा ।
"अपेक्षा भिक्षायामपि किमपि चेतः स्वपयति" ।
इति शान्तिशतके । प्रयत्नः । अनुरागः । सम्माननाः ।
"अलब्धं चैव लिप्सेत लब्धं रक्षेदपेक्षया ।
रक्षितं वर्द्धयेच्चैव वृद्धं पात्रेषु निक्षिपेत्" ॥
इति मनुः । पर्य्यालोचनं । विचारः । अनुचिन्तनं ।
"सत्यामपि तपःसिद्धौ नियमापेक्षया मुनिः" ।
इति रघुवंशे ।
"न क्षुद्रोऽपि प्रथमसुकृतापेक्षया संश्रयाय" ।
इति मेघदूते ।)

अपेक्षाबुद्धिः, स्त्री, अनेकैकत्वविषयकबुद्धिः । नानैकत्वावगाहिबुद्धिः । अयमेकः अयमेक इत्याकारबुद्धिः । इति भाषापरिच्छेदः ॥
("अनेकैकत्वबुद्धिर्या सापेक्षाबुद्धिरुच्यते" इति
"अपेक्षाबुद्धिनाशाच्च नाशस्तेषां निरूपितः"
इति च भाषापरिच्छेदे ।)

अपोगण्डः, त्रि, (अपकृष्टकर्म्मणि वेदविहितकार्य्यादन्यकर्म्मणि गण्डः उद्यतः, गडि उद्यमे + पचाद्यच्, निपातनात् अपशब्दस्याकारस्य उकारः, अपसि कर्म्मणि गण्डः अतिभीरुत्वात् त्याज्यः ।) स्वभावतो न्यूनाधिकाङ्गविशिष्टः । तत्पर्य्यायः । पोगण्डः २ विकलाङ्गः ३ अङ्गहीनकः ४ । इति शब्दरत्नावली ॥ शिशुः । वलिभः । त्रिवलियुक्तः । इति मेदिनी ॥ अतिभीरुः । इति विश्वो हेमचन्द्रश्च ॥ द्वे स्वभावतो न्यूनाधिकाङ्गे ऊनविंशत्यङ्गुलीकैकविंशत्यङ्गुलीकादौ जने वर्त्तते इत्यर्थः । विकलं स्वभावहीनं अङ्गमस्य विकलाङ्गः । अपकृष्टं गच्छति अपोगण्डः । नास्तीति गमेर्डः निपातनात् पस्य पोभावः ।
"अपोगण्डस्तु शिशुके विकलाङ्गे च भीरुके" ।
इति विश्वः ॥ निपातनादपस्यादिलोपे पोगण्डोऽपि । पोगण्डो विकलाङ्गे स्यादिति हलायुधः ॥ पोगण्डो विकलाङ्गकः । इति रत्नकोषः । इति तट्टीकायां भरतः ।

अपोदिका, स्त्री, (अपगतमुदकं यस्याः सा, स्त्रियां टाप्, पृषोदरादित्वात् दित्वं ।) उपोदिका । पूतिकाशाकं । इत्यमरटीकायां स्वामी ॥

अपोहः, पुं, (अप + ऊह + भावे घञ् ।) अपगत ऊहः । वितर्काभावः । शुश्रूषाद्यष्टधीगुणान्तर्गतषष्ठगुणः ।
("शुश्रूषा श्रवणं चैव ग्रहणं धारणं तथा ।
ऊहोऽपोहोऽर्थविज्ञानं तत्त्वज्ञानं च धीगुणाः") ॥
इति हेमचन्द्रः ॥ अतद्व्यावृत्तिः । इति काव्यप्रकाशटीकायां महेश्वरः ॥

अप्नः, [स्] क्ली, (आप्यते स्वर्गो लभ्यतेऽनेन, आप + करणे तस् ह्रस्वः ।) यज्ञकर्म्म । इत्युणादिकोषः ॥

अप्नुः, पुं, (आप्यते भोगाय प्राप्यते यः, आप् + कर्म्मणि नुः ह्रस्वः ।) शरीरं । अङ्गं । इत्युणादिकोषः ॥ ("अप्नानवे द्वितीये यामाहूतिं जुहोति" । इति शतपथब्राह्मणः ।)

अप्नः, [स्] क्ली, (आप् + असुन् नुट् ह्रस्वश्च ।) जलं । वेदप्रयोगोऽयं ॥

अप्पतिः, पुं, (अपां पतिः, षष्ठीतत्पुरुषः ।) वरुणः । इत्यमरः ॥ समुद्रः । अपाम्पतिरिति दर्शनात् ॥

अप्पित्तं, क्ली, (अपां पित्तमिव ।) अग्निः । इत्यमरः ॥ चित्रकवृक्षः । वह्निसंज्ञकत्वात् ॥

अप्रकटः, त्रि, (न प्रकटः व्यक्तः नञ्समासः ।) अव्यक्तः । अप्रकाशः । यथा,—
"प्रकटाप्रकटा चेति लीला सेयं द्विधोच्यते" ।
इति भागवतामृते पद्मपुराणं ॥ अस्य विवरणं लीलाशब्दे द्रष्टव्यं ॥

अप्रकाण्डः, पुं, (नास्ति प्रकृष्टः काण्डः स्कन्धो यस्य सः ।) काण्डरहितवृक्षः । स तु भिण्टिकादिः । तत्पर्य्यायः । स्तम्बः २ गुल्मः ३ । इत्यमरः ॥

अप्रकाशः, पुं, (न प्रकाशः नञ्समासः ।) प्रकाशाभावः । तत्पर्य्यायः । जनान्तिकं २ । इति त्रिकाण्डशेषः ॥ (गुप्तः । अप्रकाशितः । गूढः ।
"द्विविधांस्तस्करान् विद्यात् परद्रव्यापहारकान् ।
प्रकाशांश्चाप्रकाशांश्च चारचक्षुर्महीपतिः" ॥
इति मनुः । न प्रकाशते इति अप्रकाशः, पचाद्यच् । अन्धकारावृतः, अदृश्यः ।
"प्रकाशश्चाप्रकाशश्च लोकालोक इवाचलः" ।
इति रघुवंशे । निहितः । प्रच्छादितः । प्रोषितः ।
"यानि चैवंप्रकाराणि कालाद्भूमिर्न भक्षयेत् ।
तानि सन्धिषु सीमायामप्रकाशानि कारयेत्" ॥
इति मनुः । रहसि । परोक्षे ।
"नाततायिवधे दोषो हन्तुर्भवति कश्चन ।
प्रकाशं वा प्रकाशं वा मन्युस्तन्मन्युमृच्छति" ॥
इति मनुः ।) तद्विशिष्टे त्रि ॥

अप्रकृष्टः, पुं, (न प्रकृष्टः नञ्समासः ।) काकः । इति शब्दरत्नावली ॥ अधमे त्रि ॥

अप्रखरः, त्रि, (न प्रखरः तीक्ष्णः नञ्समासः ।) प्राखर्य्यरहितः । अतीक्ष्णः । तद्धर्म्मे क्ली । खं रातीति कः खरः प्रकृष्टः खरः प्रखरस्ततो नञ्समासः । (मृदुः । शान्तः ।)

अप्रगुणः, त्रि, (न प्रकृष्टो गुणो धैर्य्यरूपो यस्य सः, गुणमप्राप्तः प्रादिसमासः ततो नञ्समासः ।) व्याकुलः । व्यस्तः । इत्यमरः ॥

अप्रतिकरः, त्रि, (प्रति करोति विश्वासं नोत्पादयति प्रति + कृ + कर्त्तरि अच्, न प्रतिकरः ततो नञ्समासः ।) विश्वस्तः । विश्वासपात्रं । इति जटाधरः ॥

अप्रतिपक्षः, त्रि, अप्रतियोगी । विपक्षशून्यः । नास्ति प्रतिपक्षो यस्य इति बहुव्रीहिसमासनिष्पन्नः ॥

अप्रतिभः, त्रि, अप्रत्युत्पन्नमतिः । अप्रगल्भः । नास्ति प्रतिभा नवनवोन्मेषशालिनी प्रज्ञा यस्य सः । इति प्रतिभान्वितशब्दार्थे भरतः ॥ (मृदुः । लज्जाशीलः । हतप्रभः ।) (स्त्रियां उत्तरस्याप्रतिपत्ति-